**CLASS : 10th (Secondary)** **Code No. 4809**

**Series : Sec. M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

## शेमुषी

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितंगद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

मुखे रोटिकाखण्डं गृहीत्वा एकः काकः वृक्षे उपविष्टः आसीत्। एकः शृगालः तम् दृष्ट्वा अवदत् – 'भो मित्र ! खगेषु भवान् सुन्दरः मधुरगायकः च। कृपया गायतु इति।' रोटिकाखण्डम् पादयोः अधः स्थापयित्वा काकः अवदत् – 'रे नाहं पूर्ववत् मूर्खः। गताः ते दिवसाः। तर्हि गच्छतु इति।' लज्जितः शृगालः शिरः नत्वा ततः पलायितः।



Downloaded from www.cclchapter.com

*प्रश्नाः –* 5 × 2 = 10

(क) कः लज्जितः अभवत् ?

(ख) काकः कुत्र उपविष्टः आसीत् ?

(ग) काकः रोटिकाखण्डम् कुत्र अस्थापयत् ?

(घ) शृगालः काकं दृष्ट्वा किम् अवदत् ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक–लेखनम्)**

**2.** भवतः नाम प्रतीकः। विद्यालयस्य प्रतियोगितासु भवता अनेकानि पदकानि जितानि। आदित्यं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – 4 × 1 = 4

परीक्षाभवनम्

तिथिः

प्रियमित्र (i) ..............,

सस्नेहं नमस्ते।



Downloaded from www.cclchapter.com

अत्र कुशलं तत्रास्तु। मया (ii) ……….. प्रतियोगितासु भागः गृहीतः। 100 मी० धावनप्रतियोगितायां मया (iii) ……….. प्राप्तम्। 200 मी० धावनप्रतियोगितायां च रजतपदकम्। पितृभ्यां मम प्रणामाः।


तव अभिन्नमित्रम्

(iv) ………..।

**मञ्जूषा**

| प्रतीकः, स्वर्णपदकम्, अनेकासु, आदित्यः। |
| --- |

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितम_जूषापदैः पूरयत – 4 × 1 = 4





Downloaded from www.cclchapter.com

(i) इदम् ............ राजद्वारस्य अस्ति।

(ii) राजा .............. अधितिष्ठति।

(iii) चित्रे द्वौ .............. अपि स्तः।

(iv) राजा .............. सह वार्तालापं करोति।

**म_जूषा**

| राजकुमाराभ्याम्, चित्रम्, राजसिंहासनम्, राजकुमारौ। |
|---|

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'जलस्य महत्त्वम्' इति विषयम् अधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।



Downloaded from www.cclchapter.com

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – 4

सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटतया प्रहृत्य जगाद – 'कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ ?'

**अथवा**

आम् सत्यं कथितं त्वया—वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखितव्यः – 4

व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।।

**अथवा**

संपत्तौ च विपत्तौ च महतामेकरूपता।
उदये सविता रक्तो रक्तश्चास्तमये तथा।।



Downloaded from www.cclchapter.com

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – 2 × 2 = 4

(क) हरिततरूणां ललितलतानां माला रमणीया।

(ख) वसन्तसमये प्राप्ते काकः काकः पिकः पिकः।

(ग) एक एव खगो मानी वने वसति चातकः।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां म_जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत्।

***प्रश्नाः –*** 3 × 1 = 3

(क) दैवगतिः कीदृशी वर्तते ?

(ख) गृहाभ्यन्तरं कः प्रविष्टः ?

(ग) अतिथिः केन प्रबुद्धः ?



Downloaded from www.cclchapter.com

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत –

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

***प्रश्नाः –*** $2 \times 1 = 2$

(क) धर्मप्रदां वाचं कः त्यजति ?

(ख) मूढः पुरुषः कां वाणीं वदति ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) वृष्टिभिः वसुधां मेघाः आर्द्रयन्ति।

(ख) प्राणेभ्योऽपि प्रियः सुहृत्।

(ग) स भारवेदनया क्रन्दति स्म।

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4



Downloaded from www.cclchapter.com

## खण्डः 'घ'

## (अनुप्रयुक्त–व्याकरणम्)

**11.** कर्मकारकस्य ***अथवा*** अधिकरणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**12.** यण्सन्धेः ***अथवा*** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** कर्मधारयसमासस्य ***अथवा*** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** यथानिर्दिष्टशब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य सप्तमी - बहुवचने।

(ख) 'गुरु' शब्दस्य चतुर्थी - एकवचने।

(ग) 'रमा' शब्दस्य षष्ठी - द्विवचने।

(घ) 'पितृ' शब्दस्य द्वितीया - बहुवचने।



Downloaded from www.cclchapter.com

**15.** यथानिर्दिष्टधातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' धातुः, लट्लकारः, प्रथमपुरुषस्य द्विवचने।

(ख) 'गम्' धातुः, लङ्लकारः, मध्यमपुरुषस्य एकवचने।

(ग) 'पठ्' धातुः, लृट्लकारः, उत्तमपुरुषस्य बहुवचने।

(घ) 'सेव्' धातुः, लोट्लकारः, प्रथमपुरुषस्य द्विवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत – 4 × 1 = 4

(क) गृहस्थः .............. आश्रयम् अयच्छत्।

(अतिथये/अतिथिषु)

(ख) ........... विना इदं दुष्करं कः कुर्यात्।

(चन्दनदासस्य/चन्दनदासेन)

(ग) पिता ........... विद्याधनं यच्छति। (पुत्राय/पुत्रे)

(घ) ........... निकषा औषधालयं वर्तते। (नगरस्य/नगरम्)



Downloaded from www.cclchapter.com

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $2 \times 1 = 2$

(i) व्यायामः .............. पथ्यः। (अन्यथा/सर्वदा)

(ii) .............. हरितिमा तत्र शुचिपर्यावरणम्। (कुत्र/यत्र)

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

$2 \times 1 = 2$

(i) उपवसति।

(ii) अवलोकयति।

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत –

$3 \times 1 = 3$

(i) न + अस्ति,

(ii) यदुक्तम्,

(iii) शरत् + चन्द्रः।



Downloaded from www.cclchapter.com

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(i) अनुरथम्,

(ii) देशभक्तः,

(iii) दशाननः।

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगः वियोगः वा करणीयः –

$4 \times 1 = 4$

(i) परिश्रम्य,

(ii) क्रुध् + क्त,

(iii) शालीनता,

(iv) कृ + तव्यत्।

**खण्डः 'ङ'**

**(बहुविकल्पीय-प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'वपुः' इति पदस्य पर्यायपदं किम् ?



Downloaded from www.cclchapter.com

(i) शरीरम्

(ii) वनम्

(iii) मुखम्

(iv) आननम्

(ख) 'सार्थकम्' इति पदस्य विलोमपदं किम् ?

(i) रूपम्

(ii) निरर्थकम्

(iii) बलम्

(iv) नीरम्

(ग) 'तुल्यवत्सला जननी' अत्र विशेषणपदं किम् ?

(i) जननी

(ii) तुल्य

(iii) तुल्यवत्सला

(iv) वत्सला



Downloaded from www.cclchapter.com

(घ) ‘कुमारयोः कुशलवयोः’ अत्र विशेष्यपदं किम् ?

(i) कुश

(ii) लव

(iii) कुमारयोः

(iv) कुशलवयोः

(ङ) ‘77’ इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(i) सप्ततिः

(ii) द्विसप्ततिः


(iii) सप्तसप्ततिः

(iv) पञ्चसप्ततिः



Downloaded from www.cclchapter.com

(च) कृष्णः ............. आपणं गच्छति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत) :




(i) द्वादशवादने

(ii) दशवादने

(iii) नववादने

(iv) अष्टवादने



Downloaded from www.cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 4809**

**Series : Sec. M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : B***

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

## शेमुषी

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः –*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितंगद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत –

एकदा एकः व्याधः वने जालम् प्रासारयत्। एकः सिंहः तस्मिन् जाले बद्धः अभवत्। सः सिंहः जालं त्रोटनाय प्रयत्नं कृतवान्। परं तस्य प्रयासः वृथा जातः। अतः सः उच्चैः अगर्जत्। सिंहस्य गर्जनं श्रुत्वा एकः मूषकः तत्रागच्छत् अवदत् च — 'भो वनराज ! दुःखी मा



Downloaded from www.cclchapter.com

भव। अहम् नूनं तव सहायतां करिष्यामि। मित्रस्य परीक्षा विपत्तौ एव भवति।'

***प्रश्नाः –*** 5 × 2 = 10

(क) सिंहः जालं त्रोटनाय किम् कृतवान् ?

(ख) एकः व्याधः कुत्र जालम् प्रासारयत् ?

(ग) सिंहः कस्मिन् बद्धः अभवत् ?

(घ) मित्रस्य परीक्षा कदा भवति ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक–लेखनम्)**

**2.** भवतः नाम रमेशः। माधवं प्रति दीपमालाविषये लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – 4 × 1 = 4

परीक्षाभवनम्

तिथिः



Downloaded from www.cclchapter.com

प्रियमित्र (i) ............. ,

सप्रेम नमस्ते।

अत्र कुशलं तत्रास्तु। अहम् अद्य (ii) .......... लिखामि। कुटुम्बमध्ये स्थित्वा मया सहर्षं दीपमाला मानिता। अस्माकं गृहस्य अन्तः बहिश्च प्रकाशस्य पुञ्जः एव उद्गतः आसीत्। विविधानि मिष्ठान्नानि अस्माभिः खादितानि वत्सलानां मित्राणां गृहेषु च परिवेषितानि। मन्ये भवता अपि दीपमाला (iii) .......... सह मानिता भवेत्।

भवतः अभिन्नमित्रम्

(iv) ..........।


**मञ्जूषा**

| रमेशः, परिजनैः, माधव, दीपमालाविषये। |
|---|



Downloaded from www.cclchapter.com

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितम_जूषापदैः पूरयत – 4 × 1 = 4



(i) इदं चित्रम् ............ अस्ति।

(ii) माता पुत्राभ्याम् .............. गच्छति।

(iii) एकः .............. अपि वर्तते।

(iv) वने विविधाः .............. सन्ति।

**म_जूषा**

| |
|---|
| वृक्षाः, व्याघ्रः, वनस्य, सह। |



Downloaded from www.cclchapter.com

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'प्रातः भ्रमणम्' इति विषयम् अधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः – 4

तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

**अथवा**

न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।



Downloaded from www.cclchapter.com

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखितव्यः – 4

वयोबलशरीराणि देशकालाशनानि च।

समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्।।

**अथवा**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) एक एव खगो मानी वने वसति चातकः।

(ख) निहन्यन्ते च विवशाः प्राणिनः।

(ग) दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – अहं प्रकृतिः युष्माकं सर्वेषां जननी ? यूयं सर्वे एव मे प्रियाः। सर्वेषामेव मत्कृते महत्त्वं विद्यते। यथासमयम् न तावत् कलहेन समयं वृथा यापयन्तु अपितु मिलित्वा एव मोदध्वम् जीवनं च रसमयं कुरुध्वम्।



Downloaded from www.cclchapter.com

*प्रश्नाः –* 3 × 1 = 3

(क) प्रकृतिः सर्वेषां का अस्ति ?

(ख) मिलित्वा एव किं कुरुध्वम् ?

(ग) यथासमयम् मत्कृते सर्वेषां किं विद्यते ?

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत –

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

न कुर्यादहितं कर्म स परेभ्यः कदापि च।।

*प्रश्नाः –* 2 × 1 = 2

(क) बुद्धिमान् नरः किम् इच्छति ?

(ख) सः केभ्यः अहितं न कुर्यात् ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 3 × 1 = 3

(क) चातकः <u>वने</u> वसति।



Downloaded from www.cclchapter.com

(ख) तृणानाम् अग्निना सह विरोधो भवति।

(ग) विवशाः प्राणिनः आकाशे पिपीलिका इव निहन्यन्ते।

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**11.** करणकारकस्य ***अथवा*** सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**12.** वृद्धिसन्धेः ***अथवा*** स्वरसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** द्विगुसमासस्य ***अथवा*** बहुव्रीहिसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** यथानिर्दिष्टशब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य चतुर्थी - एकवचने।



Downloaded from www.cclchapter.com

(ख) 'गुरु' शब्दस्य द्वितीया - बहुवचने।

(ग) 'रमा' शब्दस्य तृतीया - द्विवचने।

(घ) 'पितृ' शब्दस्य सप्तमी - एकवचने।

**15.** यथानिर्दिष्टधातुरूपाणि लिखत — $4 \times 1 = 4$

(क) 'भू' धातुः, लट्लकारः, मध्यमपुरुषस्य बहुवचने।

(ख) 'गम्' धातुः, लङ्लकारः, प्रथमपुरुषस्य एकवचने।

(ग) 'पठ्' धातुः, लृट्लकारः, मध्यमपुरुषस्य बहुवचने।

(घ) 'सेव्' धातुः, लोट्लकारः, उत्तमपुरुषस्य द्विवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत — $4 \times 1 = 4$

(क) .............. विना जीवनं न सम्भवति। (जलात्/जलस्य)

(ख) छात्रः ........... प्रश्नं पृच्छति। (आचार्येण/आचार्यम्)

(ग) सः ........... वहिरगच्छत्। (गृहस्य/गृहात्)

(घ) सः ........... खञ्जः अस्ति। (चरणात्/चरणेन)



Downloaded from www.cclchapter.com

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – 2 × 1 = 2

(i) व्यायामं समीक्ष्य ............. कर्तव्यम्। (एव/अन्यथा)

(ii) पिकः परभृत् ............. कथ्यते। (स्थितप्रज्ञः/अपि)

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

2 × 1 = 2

(i) विस्मर्यते।

(ii) प्रविशति।

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत –

3 × 1 = 3

(i) यत्रास्ते,

(ii) द्वयोः + अपि,

(iii) कुर्वन् + आसीत्।



Downloaded from www.cclchapter.com

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(i) उपग्रामम्,

(ii) नीलकमलम्,

(iii) पञ्चवटी।

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगः वियोगः वा करणीयः –

$4 \times 1 = 4$

(i) रमणीया,

(ii) चल् + क्त,

(iii) छदत्वम्,

(iv) सेव् + तव्यत्।



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'पाषाणम्' इति पदस्य पर्यायपदं किम् ?

(i) प्रस्तरम्

(ii) वनम्

(iii) अरण्यम्

(iv) काननम्

(ख) 'बुद्धिहीना' इति पदस्य विलोमपदं किम् ?

(i) अधुना

(ii) नवीना

(iii) बुद्धिमती

(iv) श्रीमती



Downloaded from www.cclchapter.com

(ग) 'हृदयग्राही स्पर्शः' अत्र विशेषणपदं किम् ?

(i) स्पर्शः

(ii) हृदयग्राही

(iii) हृदयः

(iv) ग्राही

(घ) 'क्रुद्धः कृषकः' अत्र विशेष्यपदं किम् ?

(i) क्रु

(ii) कृ

(iii) क्रुद्धः

(iv) कृषकः

(ङ) '71' इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(i) एकसप्ततिः

(ii) द्विसप्ततिः


(iii) त्रिसप्ततिः

(iv) पञ्चसप्ततिः



Downloaded from www.cclchapter.com

(च) दीपकः .............. उत्तिष्ठति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत) :




(i) पञ्चवादने

(ii) त्रिवादने

(iii) चतुर्वादने

(iv) षड्वादने



Downloaded from www.cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 4809**

**Series : Sec. M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : C***

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

**शेमुषी**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः—*

*(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत —

एकस्मिन् वने एकः सिंहः निवसति स्म। एकदा सिंहः वृक्षस्य अधः सुप्तः आसीत्। तदा एकः मूषकः तत्र आगच्छत्। मूषकः सिंहस्य शरीरे अनृत्यत्। मूषकस्य नृत्येन सिंहः प्रबुद्धः मूषकाय च अक्रुध्यत्। मूषकः उच्चैः अक्रन्दत् अवदत् च — 'भो वनराज ! मयि दयां कुरु। अहम् अपि विपत्तौ तव सहायतां करिष्यामि।'



Downloaded from www.cclchapter.com

*प्रश्नाः –* 5 × 2 = 10

(क) मूषकः कुत्र अनृत्यत् ?

(ख) एकस्मिन् वने कः निवसति स्म ?

(ग) कस्य नृत्येन सिंहः प्रबुद्धः ?

(घ) सिंहः कुत्र सुप्तः आसीत् ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक–लेखनम्)**

**2.** भवतः नाम सुबोधः। दीपकं प्रति वार्षिकोत्सवविषये लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – 4 × 1 = 4

परीक्षाभवनम्

तिथिः



Downloaded from www.cclchapter.com

प्रियमित्र (i) .............,

सप्रेम नमस्ते।

अत्र कुशलं तत्रास्तु। अहं स्वविद्यालयस्य (ii) .......... वर्णयामि। एकमासपूर्वमेव सर्वे अध्यापकाः छात्राः च कार्येषु व्यस्ताः आसन्। शिक्षानिदेशकः कार्यक्रमस्य (iii) ............. आसीत्। सः कार्यक्रमयू अतीव प्राशंसत्।

गृहे सर्वेभ्योमम प्रणामाः।

भवतः अभिन्नमित्रम्

(iv) ..........।

**मञ्जूषा**

| सुबोधः, दीपक, वार्षिकोत्सवम्, मुख्यातिथिः। |
|---|



Downloaded from www.cclchapter.com

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितम_जूषापदैः पूरयत – 4 × 1 = 4



(i) इदं चित्रम् ............ अस्ति।

(ii) वाहनानि .............. गच्छन्ति।

(iii) यानानाम् अनन्ताः .............. धावन्ति।

(iv) एकः .............. प्रतीक्षारतः वर्तते।

**म_जूषा**

| |
|---|
| नरः, पङ्क्तयः, यातायातस्य, इतस्ततः। |



Downloaded from www.cclchapter.com

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम जननी' इति विषयम् अधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः — 4

प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटतया प्रहरन्ती दृष्टा।

**अथवा**

यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः।



Downloaded from www.cclchapter.com

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखितव्यः – 4

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।।

**अथवा**

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – $2 \times 2 = 4$

(क) रे रे चातक ! सावधानमनसा मित्र क्षणं श्रूयताम्।

(ख) नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।

(ग) मानवाय जीवनं कामये नो जीवन्मरणम्।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?



Downloaded from www.cclchapter.com

*प्रश्नाः* –　　3 × 1 = 3

(क) कः तं बहुधा पीडयति ?

(ख) सः कृच्छ्रेण किम् उद्वहति ?

(ग) इतरमिव सः किं कर्तुं न शक्नोति ?

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत –

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।

पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।

*प्रश्नाः* –　　2 × 1 = 2

(क) पिता पुत्राय बाल्ये किं यच्छति ?

(ख) इत्युक्तिः तत् का अस्ति ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –　　3 × 1 = 3

(क) सरसः शोभा <u>राजहंसेन</u> भवति।

(ख) <u>चाणक्यः</u> चन्दनदासं द्रष्टुम् इच्छति।



Downloaded from www.cclchapter.com

(ग) संसारे विद्वांसः नेत्रवन्तः कथ्यन्ते।

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**11.** कर्त्ताकारकस्य ***अथवा*** अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**12.** अयादिसन्धेः ***अथवा*** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** अव्ययीभावसमासस्य ***अथवा*** कर्मधारयसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** यथानिर्दिष्टशब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य द्वितीया - बहुवचने।

(ख) 'गुरु' शब्दस्य तृतीया - एकवचने।

(ग) 'रमा' शब्दस्य सप्तमी - बहुवचने

(घ) 'पितृ' शब्दस्य पञ्चमी - एकवचने।



Downloaded from www.cclchapter.com

**15.** यथानिर्दिष्टधातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' धातुः, लट्लकारः, उत्तमपुरुषस्य बहुवचने।

(ख) 'गम्' धातुः, लङ्लकारः, मध्यमपुरुषस्य बहुवचने।

(ग) 'पठ्' धातुः, लृट्लकारः, प्रथमपुरुषस्य द्विवचने।

(घ) 'सेव्' धातुः, लोट्लकारः, उत्तमपुरुषस्य एकवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत – 4 × 1 = 4

(क) .............. विना जीवनं न सम्भवति। (जलेन/जलस्य)

(ख) अलम् ........... । (कलहेन/कलहात्)

(ग) ........... इदं वृत्तान्तं निवेदयामि। (गुरोः/गुरवे)

(घ) ........... निकषा नदी वहति। (ग्रामस्य/ग्रामम्)



Downloaded from www.cclchapter.com

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $2 \times 1 = 2$

(i) इदानीं वायुमण्डलम् .............. प्रदूषितमस्ति।

(भृशम्/बहिः)

(ii) व्यायामेन असुन्दराः .............. सुन्दराः भवति।

(सदृशम्/अपि)

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

$2 \times 1 = 2$

(i) प्रपद्यते।

(ii) उपवेशयामि।

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत –

$3 \times 1 = 3$

(i) चास्ति,

(ii) कः + अत्र,

(iii) सत् + चित्।



Downloaded from www.cclchapter.com

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(i) उपग्रामम्,

(ii) महापुरुषः,

(iii) पितरौ।

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगः वियोगः वा करणीयः –

$4 \times 1 = 4$

(i) करणीयम्,

(ii) हन् + क्त,

(iii) कर्तव्यः,

(iv) आ + कृष् + ल्यप्।



Downloaded from www.cclchapter.com

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'आम्रम्' इति पदस्य पर्यायपदं किम् ?

(i) मुखम्

(ii) रसालम्

(iii) दुग्धम्

(iv) रूपम्

(ख) 'सुलभः' इति पदस्य विलोमपदं किम् ?

(i) दुर्लभः

(ii) नीरोगः

(iii) स्वस्थः

(iv) दोषः



Downloaded from www.cclchapter.com

(ग) 'प्रबुद्धः अतिथिः' अत्र विशेषणपदं किम् ?

(i) प्र

(ii) बुद्धः

(iii) प्रबुद्धः

(iv) अतिथिः

(घ) 'प्रभूतानि सुखानि' अत्र विशेष्यपदं किम् ?

(i) प्रभू

(ii) तानि

(iii) प्रभूतानि

(iv) सुखानि

(ङ) '75' इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(i) पञ्चसप्ततिः

(ii) सप्ततिः


(iii) अशीतिः

(iv) नवतिः



Downloaded from www.cclchapter.com

(च) छात्रः .............. विद्यालयं गच्छति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत) :




(i) नववादने

(ii) दशवादने

(iii) अष्टवादने

(iv) षड्वादने



Downloaded from www.cclchapter.com

**CLASS : 10th (Secondary)** **Code No. 4809**

**Series : Sec. M/2020**

*रोल नं०* | | | | | | | | | | |

***SET : D***

# संस्कृत

*(Academic/Open)*

(Only for Fresh/Re-appear Candidates)

## शेमुषी

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** तथा प्रश्न **20** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***



Downloaded from www.cclchapter.com

*निर्देशः—*

*(i)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii)* *श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितंगद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत —

पुरा बलिः नामकः एकः नृपः आसीत्। सः महादानी आसीत्। एकदा तस्य दानशीलतां परीक्षितुं भगवान् विष्णुः वामनवेशं धृत्वा बलेः राज्यम् आगच्छत्। सः राजानं बलिं त्रीणि पदानि यावत् भूमिम् अयाचत। राजा बलिः भूमिदानं कर्तुं तत्परः अभवत्। तदा भगवान्



Downloaded from www.cclchapter.com

विष्णुः स्वविराटरूपम् अधारयत्। सः एकेन पदेन अन्तरिक्षम् द्वितीयेन च समस्तभूलोकम् अमात्।

***प्रश्नाः –*** $5 \times 2 = 10$

(क) राजा बलिः किं कर्तुं तत्परः अभवत् ?

(ख) एकदा भगवान् विष्णुः कस्य राज्यम् आगच्छत् ?

(ग) विष्णुः राजानं बलिं कति भूमिम् अयाचत ?

(घ) भगवान् विष्णुः कीदृशं रूपम् अधारयत् ?

(ङ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

**खण्डः 'ख'**

**(रचनात्मक–लेखनम्)**

**2.** भवतः नाम प्रवीणः। विद्यालयस्य क्रीडादिवससमारोहस्य विषये मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत – $4 \times 1 = 4$

परीक्षाभवनम्

तिथिः



Downloaded from www.cclchapter.com

प्रियमित्र अभिनव,

सप्रेम नमस्ते।

अत्र (i) ………….. तत्रास्तु। गतसप्ताहे अस्माकं विद्यालये क्रीडादिवससमारोहः। (ii) ………….. । सर्वैः छात्रैः उत्साहेन भागः गृहीतः। विद्यालयस्य प्रधानाचार्यः छात्रान् प्राशंसत् तेभ्यः (iii) ………….. अयच्छत्। एषः समारोहः सर्वथा सफलः आसीत्।

भवतः अभिन्नमित्रम्

(iv) ………..।

**मञ्जूषा**

| प्रवीणः, पुरस्कारान्, कुशलम्, आयोजितः। |
|---|



Downloaded from www.cclchapter.com

**3.** चित्रं दृष्ट्वा अधः प्रदत्तवाक्यानि पठित्वा रिक्तस्थानानि उचितम_जूषापदैः पूरयत – 4 × 1 = 4



(i) इदं चित्रम् ………… वर्तते।

(ii) सरोवरतटे वृक्षाः …………… ।

(iii) तटे पुष्पाणि …………… सन्ति।

(iv) वृक्षेषु …………… अपि सन्ति।

**म_जूषा**

| |
|---|
| खगाः, सरोवरस्यः, शोभन्ते, विकसितानि। |



Downloaded from www.cclchapter.com

**अथवा**

**(केवलं प्रज्ञाचक्षुर्भ्यः)**

'मम विद्यालयः' इति विषयम् अधिकृत्य ***चत्वारि*** वाक्यानि संस्कृतभाषायां लिखत।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**4.** अधोलिखितगद्यांशस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखनीयः — 4

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह — 'भवान् कुतः भयात् पलायितः ?'

**अथवा**

वानराः हसन्ति वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमीक्षितं कलरवं कुर्वन्ति।



Downloaded from www.cclchapter.com

**5.** अधोलिखितश्लोकस्य सप्रसंगं हिन्दीभाषायां सरलार्थः लेखितव्यः – 4

शरीरायासजननं कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।

**अथवा**

एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

**6.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थं हिन्दीभाषायां लिखत – 2 × 2 = 4

(क) दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।

(ख) क्रोधो हि शत्रुः प्रथमो नराणाम्।

(ग) वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।

**7.** अधोलिखितगद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत।



Downloaded from www.cclchapter.com

*प्रश्नाः –* 3 × 1 = 3

(क) कृषकः किं कुर्वन्नासीत् ?

(ख) शरीरेण कः दुर्बलः आसीत् ?

(ग) कृषकः कं तोदनेन नुद्यमानः अवर्तत ?

**8.** अधोलिखितश्लोकं पठित्वा प्रश्नोत्तराणि संस्कृतेन लिखत –

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः।।

*प्रश्नाः –* 2 × 1 = 2

(क) प्रथमः धर्मः कः अस्ति ?

(ख) प्राणेभ्योऽपि विशेषतः किं रक्षेत् ?

**9.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 3 × 1 = 3

(क) पतङ्गाः अम्बरपथम् आपेदिरे।

(ख) आर्यस्य प्रसादेन मे वाणिज्या अखण्डिता।

(ग) एतादृशी भयावहघटना गढ़वालक्षेत्रे घटिता।



Downloaded from www.cclchapter.com

**10.** प्रश्नपत्रे लिखितश्लोकान् विहाय 'शेमुषी' द्वितीयो भागः पुस्तकात् ***एकं*** शुद्धं श्लोकं संस्कृतभाषायां लिखत। 4

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**11.** कर्मकारकस्य ***अथवा*** सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**12.** गुणसन्धेः ***अथवा*** व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**13.** तत्पुरुषसमासस्य ***अथवा*** द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 2

**14.** यथानिर्दिष्टशब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'राम' शब्दस्य तृतीया - बहुवचने।

(ख) 'गुरु' शब्दस्य चतुर्थी - बहुवचने।

(ग) 'रमा' शब्दस्य षष्ठी - एकवचने।

(घ) 'पितृ' शब्दस्य द्वितीया - एकवचने।



Downloaded from www.cclchapter.com

**15.** यथानिर्दिष्टधातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' धातुः, लट्लकारः, प्रथमपुरुषस्य बहुवचने।

(ख) 'गम्' धातुः, लङ्लकारः, मध्यमपुरुषस्य एकवचने।

(ग) 'पठ्' धातुः, लृट्लकारः, उत्तमपुरुषस्य द्विवचने।

(घ) 'सेव्' धातुः, लोट्लकारः, प्रथमपुरुषस्य बहुवचने।

**16.** प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिप्रयोगं कुरुत – 4 × 1 = 4

(क) .............. विना जीवनं न सम्भवति। (जलस्य/जलम्)

(ख) वीरः ........... बालं रक्षति। (सिंहेन/सिंहात्)

(ग) तौ ........... प्रति प्रस्थितौ। (न्यायाधीशम्/न्यायाधीशे)

(घ) अलम् ...........। (अतिविस्तरेण/अतिविस्तरात्)



Downloaded from www.cclchapter.com

**17.** (क) प्रदत्तवाक्येषु रिक्तस्थानपूर्तिम् अव्ययपदैः कुरुत – $2 \times 1 = 2$

(i) यत्र हरितिमा ............. शुचि पर्यावरणम्।

(तत्र/सदा)

(ii) ............. व्यायामः कर्त्तव्यः। (सदृशम्/सर्वदा)

(ख) अधोलिखितक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

$2 \times 1 = 2$

(i) उपजायते।

(ii) अधिरोहति।

**18.** (क) अधोलिखितपदानां सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत –

$3 \times 1 = 3$

(i) प्रकृतिः + एव,

(ii) एकैकः,

(iii) द्वावपि।



Downloaded from www.cclchapter.com

(ख) अधोलिखितसमस्तपदानां विग्रहं कुरुत – $3 \times 1 = 3$

(i) यथाशक्ति,

(ii) पीताम्बरः,

(iii) रामलक्ष्मणौ।

**19.** अधोलिखितेषु पदेषु प्रकृतिप्रत्ययसंयोगः वियोगः वा करणीयः –

$4 \times 1 = 4$

(i) कूर्दित्वा,

(ii) प्र + स्था + क्त,

(iii) हस् + शतृ,

(iv) गम् + अनीयर।



Downloaded from www.cclchapter.com

**खण्डः – 'ङ'**

**(बहुविकल्पीय–प्रश्नाः)**

**20.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं विचित्य लिखत – $6 \times 1 = 6$

(क) 'सलिलम्' इति पदस्य पर्यायपदं किम् ?

(i) जलम्

(ii) आम्रम्

(iii) शरीरम्

(iv) कमलम्

(ख) 'सार्थकम्' इति पदस्य विलोमपदं किम् ?

(i) रूपम्

(ii) देवम्

(iii) मूर्खम्

(iv) निरर्थकम्



Downloaded from www.cclchapter.com

(ग) 'हर्षमिश्रितम् कलरवम्' अत्र विशेषणपदं किम् ?

(i) कलरवम्

(ii) कलम्

(iii) हर्षमिश्रितम्

(iv) मिश्रम्

(घ) 'करुणापरो गृही' अत्र विशेष्यपदं किम् ?

(i) करुणा

(ii) गृही

(iii) करुणापरो

(iv) अपरो

(ङ) '70' इति पदस्य किं संस्कृतसंख्यावाचकपदम् ?

(i) नवतिः

(ii) अशीतिः


(iii) सप्ततिः

(iv) पञ्चाशत्



Downloaded from www.cclchapter.com

(च) बालकः ............. भ्रमणाय गच्छति। (घटिकां दृष्ट्वा रिक्तस्थानं संस्कृतपदेन पूरयत) :




(i) पञ्चवादने

(ii) नववादने

(iii) द्वादशवादने

(iv) एकादशवादने



Downloaded from www.cclchapter.com